സമഗ്ര ചോദ്യോത്തരങ്ങൾ

Chapter Name:**निर्ममो योजकः ।** *Marks :(5)*

Quest:

**प्रश्नपाठः -** प्रादेशिकभाषया आङ्गलभाषया वा अनुवदत।

विशाखदत्तेन विरचितं भवति मुद्राराक्षसं नाटकम् अस्मिन् नाटके सप्त अङ्काः सन्ति। नाटकेऽस्मिन् चाणक्यतन्त्राणि राष्ट्रमीमांसातत्वानि च वर्णितानि। नीतिबोधस्य परा काष्टा अस्मिन् नाटके द्रष्टुं शक्यते। वीररसप्रधानं भवति एतत् नाटकम्।

Hint:

उचितरीत्या भाषानुवादः।

Chapter Name:**निर्ममो योजकः ।** *Marks :(8)*

Quest:

**प्रश्नपाठः -** "निर्ममो योजकः" इति शीर्षकस्य औचित्यं पाठाधारेण निरूप्य लघूपन्यासं लिखत।

सूचनाः - विशाखदत्तस्य मुद्राराक्षसम्, राजा चन्द्रगुप्तः,निस्वार्थः चाणक्यः,परिश्रमः,निपुणः मन्त्री अमात्यराक्षसः ।

Hint:

मूल्यनिर्णयसूचकानि

आमुखम् 2 ,सूचनानुसारलेखनम् 2, समुचितभाषाप्रयोगः2, उपसंहारः 2

Chapter Name:**निर्ममो योजकः ।** *Marks :(6)*

Quest:

**प्रश्नपाठः -** गद्यभागं पठित्वा त्रीणि प्रश्नवाक्यानि रचयत।

नन्दस्नेहगुणाः मे हृदयं स्पृशन्ति तद्विद्विषां भृत्योऽस्मि। ये द्रुमाः स्वयं सिक्ताः एव वृद्धिं अगमन् ते छिन्नाः एव। मित्रस्य शरीररक्षणकृते मया शस्त्रं व्यापारणीयम्।

(कस्य?, के?, किं?, किमर्थम्?)

**Hint:**

मूल्यनिर्णयसूचकानि

1) नन्दस्नेहगुणाः कस्य हृदयं स्पृशन्ति?

2) किमर्थं शस्त्रं व्यापारणीयम्?

3) मित्रस्य शरीररक्षणकृते किं व्यापारणीयम्?

**Chapter Name:निर्ममो योजकः ।** *Marks :(3)*

**Quest:**

**प्रश्नपाठः -** रेखाङ्कितपदानां स्थाने कोष्ठकात् समानार्थकपदाानि स्वीकृत्य गद्यांशं पुनर्लिखत ।

(अस्त्रम्, आकर्ण्य, वृक्षाः, शत्रुः)

ये द्रुमाः स्वयं सिक्ताः एव वृद्धिं अगमन् ते छिन्नाः एव। मित्रस्य शरीररक्षणकृते मया शस्त्रं व्यापारणीयम्। इदं श्रुत्वा आर्यः प्रमाणम्।

**Hint:**

मूल्यनिर्णयसूचकानि

द्रुमाः - वृक्षाः, शस्त्रं - अस्त्रम्, श्रुत्वा — आकर्ण्य।

**Chapter Name:निर्ममो योजकः ।** *Marks :(3)*

**Quest:**

**प्रश्नपाठः** - प्रदत्तं गद्यभागं पठित्वा क्त्वान्त-ल्यबन्त-तुमुन्नन्तपदानि चित्वा लिखत।

चाणक्यस्य वचनं श्रुत्वा आत्ममित्रं रक्षितुं निश्चित्य अमात्यराक्षसः चन्द्रगुप्तस्य अमात्यपदं स्वीकृतवान् ।

क्त्वान्तम् - ......................।

ल्यबन्तम् - .......................।

तुमुन्नन्तम् - ...........................।

**Hint:**

मूल्यनिर्णयसूचकानि

क्त्वान्तम् - श्रुत्वा।

ल्यबन्तम् - निश्चित्य।

तुमुन्नन्तम् - रक्षितुं।

**Chapter Name:निर्ममो योजकः ।** *Marks :(6)*

**Quest:**

**प्रश्नपाठः -** निर्ममो योजकः इति पाठाधारेण अमात्यराक्षसस्य स्वभावम् अधिकृत्य एकां खण्डिकां लिखत।

सूचनाः- स्वामिभक्तिः, मित्रस्नेहः,कर्मकौशलम् ।

**Hint:**

मूल्यनिर्णयसूचके-

सूचनानुसारं खण्डिकालेखनाय 3 अङ्काः। भाषाशैल्यै, कथापात्राणां विवरणाय, सन्दर्भप्रयोजने

च 3 अङ्काः।

**Chapter Name:निर्ममो योजकः ।** *Marks :(4)*

**Quest:**

**प्रश्नपाठः -** द्वौ नाटकसङ्केतावधिकृत्य लघुटिप्पणीं लिखत।

1) स्वगतम् 2) प्रकाशम् 3) नेपथ्यम्।

**Hint:**

मूल्यनिर्णयसूचकम्-

नाटकसङ्केतलक्षणलेखने द्वौ अङ्कौ सन्दर्भानुसारं लेखने द्वौ अङ्कौ च

**Chapter Name:निर्ममो योजकः ।** *Marks :(6)*

**Quest:**

**प्रश्नपाठः** - अधोदत्तानि चाणक्यतन्त्राणि पठित्वा नाटकानुसारं लघुटिप्पणीं लिखत।

- स्थैर्यम्।
- लक्ष्यबोधः।
- परिश्रमः।
- क्षमा।
- बुद्धिशक्तिः।
- निर्ममत्वम्।

**Hint:**

मूल्यनिर्णयसूचकम्-

सूचकान्युपयुज्य आशयसम्पूर्णटिप्पणीलेखनम्।

**Chapter Name:निर्ममो योजकः ।** *Marks :(6)*

**Quest:**

**प्रश्नपाठः -** अधोदत्तानि सूचकान्युपयुज्य निर्ममो योजकः इति नाटकांशमधिकृत्य लघुटिप्पणीं लिखत।

सूचनाः -

- मुद्राराक्षसम्।
- चाणक्यनीतिः।
- अमात्यराक्षसः।
- राजा चन्द्रगुप्तः।
- अर्थशास्त्रस्य प्रसक्तिः।

**Hint:**

मूल्यनिर्णयसूचकानि-

सूचनामनुसृत्य टिप्पणीलेखनम्।

**Chapter Name:निर्ममो योजकः ।** *Marks :(6)*

**Quest:**

**प्रश्नपाठः** -प्रदत्तं गद्यभागं पठित्वा सम्भाषणांशान् पूरयत।

चन्द्रगुप्तः सभायां प्रविश्य — आर्य! चन्द्रगुप्तः प्रणमति इत्यवदत्। तदा अयममात्यराक्षसः प्राप्तः प्रणमैनम् इति चाणक्यः प्रत्यवदत्। कुशलान्वेषणानन्तरं अमात्यराक्षस, इष्यते चन्दनदासस्य जीवितम् ? इति यदा चाणक्यः अपृच्छत् तदा "भो विष्णुगुप्त, कुतः सन्देहः" इति राक्षसेन उक्तम्। "अमात्य राक्षस, अगृहीत शस्त्रेण भवतानुगृह्यते वृषल इत्यतः सन्देहः?। यदि चन्दनदासस्य जीवितमिष्यते ततो गृह्यतामिदं शस्त्रम्"। इति चाणक्यः

प्रत्यवदत्।

राजा : आर्यः ! ............. प्रणमति।

चाणक्यः : अयम् .......... प्राप्तः।

राक्षसः : ....................।

चाणक्यः : अमात्य राक्षस, इष्यते....... जीवितम्?

राक्षसः : भो विष्णुगुप्त ..............।

चाणक्यः : यदि ............ जीवितमिष्यते ,ततो गृह्यताम् इदं शस्त्रम्।

**Hint:**

मूल्यनिर्णयसूचकम् -

रिक्तस्थानेषु उचितपदान्युपयुज्य सम्भाषणपूरणम्।

**Chapter Name:निर्ममो योजकः ।** *Marks :(5)*

**Quest:**

**प्रश्नपाठः -** यथोचितं योजयत।

| क | ख |
|---|---|
| 1) चाणक्यः | अमात्यः |
| 2) राक्षसः | विष्णुगुप्तः |
| 3) राजा। | विशाखदत्तः |
| 4) मुद्राराक्षसम् | शास्त्रग्रन्थम् |
| 5) अर्थशास्त्रम् | चन्द्रगुप्तः |

Hint:

मूल्यनिर्णयसूचिकानि

1) विष्णुगुप्तः। 2) अमात्यः। 3) चन्द्रगुप्तः। 4) विशाखदत्तः 5) शास्त्रग्रन्थम्।

Chapter Name:**निर्ममो योजकः ।** *Marks :(5)*

Quest:

**प्रश्नपाठः** -कोष्ठकात् समुचितमुत्तरं निर्धार्य लिखत।

1) कौटिल्यः कः ?

(वेदव्यासः, चाणक्यः, भासः)

2) अर्थशास्त्रं नाम ग्रन्थस्य कर्ता कः?

(भवभूतिः, भासः, कौटिल्यः)

3) मुद्राराक्षसं नाम नाटकस्य कर्ता कः?

(कालिदासः, विशाखदत्तः, विश्वामित्रः)

4) मुद्राराक्षसे कति अङ्काः सन्ति?

(सप्त , नव , दश )

5) “भो विष्णुगुप्त , कुतः सन्देहः”। विष्णुगुप्तः कः?

(राक्षसः, चाणक्यः, मलयकेतुः)

Hint:

मूल्यनिर्णयसूचकानि-

1) चाणक्यः। 2) कौटिल्यः। 3) विशाखदत्तः। 4) सप्त। 5) चाणक्यः।

Chapter Name:**निर्ममो योजकः ।** *Marks :(4)*

Quest:

**प्रश्नपाठः** - उदाहरणानुसारं पदं विश्लेषयत।

उदा - ममैव = मम + एव।

क) एवैष = — + —.।

ख) ममैवम् = —. + —..।

ग) अत्रैव = —. + —..।

घ) तत्रैव = —. + —.।

Hint:

मूल्यनिर्णयसूचकानि-

क) एव+ एष।

ख) मम+ एवम्।

ग) अत्र+ एव।

घ) तत्र+ एव।